# શ્રી મદ્ભાગવત રસિક કુટુંબ

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## UG-11.17 - તૃતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્
એકાદશઃ સ્કન્ધઃ
.. અથ સપ્તદશોઽધ્યાયઃ - ૧૭ ..

ઉદ્ધવ ઉવાચ
યસ્ત્વયાભિહિતઃ(ફ્) પૂર્વં(ન્), ધર્મસ્ત્વદ્ભક્તિલક્ષણઃ.
વર્ણાશ્રમાચારવતાં(મ્), સર્વેષાં(ન્) દ્વિપદામપિ .. ૧..
યસ્ + ત્વયા + ભિહિતઃ, ધર્મસ્ + ત્વદ્ + ભક્તિ + લક્ષણઃ
યથાનુષ્ઠીયમાનેન, ત્વયિ ભક્તિર્નૃણાં(મ્) ભવેત્ .
સ્વધર્મેણારવિન્દાક્ષ, તત્ સમાખ્યાતુમર્હસિ .. ૨..
સ્વધર્મેણા + રવિન્દાક્ષ, સમાખ્યા + તુમર્ + હસિ
પુરા કિલ મહાબાહો, ધર્મં(મ્) પરમકં(મ્) પ્રભો .
યત્તેન હં(વ્)સરૂપેણ, બ્રહ્મણેઽભ્યાત્થ માધવ .. ૩..

સ ઇદાનીં(મ્) સુમહતા, કાલેનામિત્રકર્શન .
ન પ્રાયો ભવિતા મર્ત્ય - લોકે પ્રાગનુશાસિતઃ .. ૪..

કાલેના + મિત્રકર્શન

વક્તા કર્તાવિતા નાન્યો, ધર્મસ્યાચ્યુત તે ભુવિ .
સભાયામપિ વૈરિઞ્ચ્યાં(મ્), યત્ર મૂર્તિધરાઃ(ખ્) કલાઃ .. ૫..

ધર્મસ્ + યાચ્યુત, વૈરિઞ્ + ચ્યાં(મ્)

કર્ત્રાવિત્રા પ્રવક્ત્રા ચ, ભવતા મધુસૂદન .
ત્યક્તે મહીતલે દેવ, વિનષ્ટં(ઙ્) કઃ(ફ્) પ્રવક્ષ્યતિ .. ૬..

તત્ત્વં(ન્) નઃ(સ્) સર્વધર્મજ્ઞ, ધર્મસ્ત્વદ્ભક્તિલક્ષણઃ .
યથા યસ્ય વિધીયેત, તથા વર્ણય મે પ્રભો .. ૭..

ધર્મસ્ + ત્વદ્ + ભક્તિ + લક્ષણઃ

## શ્રીશુક ઉવાચ

ઇત્થં(મ્) સ્વભૃત્યમુખ્યેન, પૃષ્ટઃ(સ્) સ ભગવાન્ હરિઃ .
પ્રીતઃ(હ્) ક્ષેમાય મર્ત્યાનાં(ન્), ધર્માનાહ સનાતનાન્ .. ૮..

સ્વભૃત્ય + મુખ્યેન

## શ્રીભગવાનુવાચ

ધર્મ્ય એષ તવ પ્રશ્નો, નૈઃ(શ્)શ્રેયસકરો નૃણામ્ .
વર્ણાશ્રમાચારવતાં(ન્), તમુદ્ધવ નિબોધ મે .. ૯..

વર્ણાશ્રમા + ચારવતાં(ન્), તમુદ્ + ધવ

આદૌ કૃતયુગે વર્ણો, નૃણાં(મ્) હં(વ્)સ ઇતિ સ્મૃતઃ .
કૃતકૃત્યાઃ(ફ્) પ્રજા જાત્યા, તસ્માત્ કૃતયુગં(મ્) વિદુઃ .. ૧૦..

વેદઃ(ફ્) પ્રણવ એવાગ્રે, ધર્મોઽહં(મ્) વૃષરૂપધૃક્ .
ઉપાસતે તપોનિષ્ઠા, હં(વ્)સં(મ્) માં(મ્) મુક્તકિલ્બિષાઃ .. ૧૧..

મુક્ત + કિલ્ + બિષાઃ

ત્રેતામુખે મહાભાગ, પ્રાણાન્મે હૃદયાત્ત્રયી .

વિદ્યા પ્રાદુરભૂત્તસ્યા, અહમાસં(ન્) ત્રિવૃન્મખઃ .. ૧૨..

હૃદયાત્ + ત્રયી, પ્રાદુરભૂત્ + તસ્યા, ત્રિવૃન્ + મખઃ

વિપ્રક્ષત્રિયવિટ્શૂદ્રા, મુખબાહૂરુપાદજાઃ .

વૈરાજાત્ પુરુષાજ્જાતા, ય આત્માચારલક્ષણાઃ .. ૧૩..

વિપ્રક્ષત્રિય + વિટ્શૂદ્રા, પુરુષાજ્ + જાતા

ગૃહાશ્રમો જઘનતો, બ્રહ્મચર્યં(મ્) હૃદો મમ .

વક્ષઃ(સ્)સ્થાનાદ્ વને વાસો, ન્યાસઃ(શ્)શીર્ષણિ સં(વ્)સ્થિતઃ .. ૧૪..

વક્ષઃ(સ્) + સ્થાનાદ્

વર્ણાનામાશ્રમાણાં(ઞ્) ચ, જન્મભૂમ્યનુસારિણીઃ .

આસન્ પ્રકૃતયો નૃણાં(ન્), નીચૈર્નીચોત્તમોત્તમાઃ .. ૧૫..

વર્ણાના + માશ્રમાણાં(ઞ્) , જન્મભૂમ્ય + નુસારિણીઃ

નીચૈર્ + નીચોત્ + તમોત્ + તમાઃ

શમો દમસ્તપઃ(શ્) શૌચં(મ્), સન્તોષઃ(હ્) ક્ષાન્તિરાર્જવમ્ .

મદ્ભક્તિશ્ચ દયા સત્યં(મ્), બ્રહ્મપ્રકૃતયસ્ત્વિમાઃ .. ૧૬..

મદ્ + ભક્તિશ્ + ચ ,બ્રહ્મ + પ્રકૃતયસ્ + ત્વિમાઃ

તેજો બલં(ન્) ધૃતિઃ(શ્) શૌર્યં(ન્), તિતિક્ષૌદાર્યમુદ્યમઃ .

સ્થૈર્યં(મ્) બ્રહ્મણ્યતૈશ્વર્યં(ઙ્), ક્ષત્રપ્રકૃતયસ્ત્વિમાઃ .. ૧૭..

તિતિક્ષૌ + દાર્ય + મુદ્યમઃ ,બ્રહ્મણ્ + યતૈશ્ + વર્યં(ઙ્)

ક્ષત્ર + પ્રકૃતયસ્ + ત્વિમાઃ

આસ્તિક્યં(ન્) દાનનિષ્ઠા ચ, અદમ્ભો બ્રહ્મસેવનમ્ .

અતુષ્ટિરર્થોપચયૈર્ - વૈશ્યપ્રકૃતયસ્ત્વિમાઃ .. ૧૮..

અતુષ્ટિ + રર્થો + પચયૈર્ ,વૈશ્ય + પ્રકૃતયસ્ + ત્વિમાઃ

શુશ્રૂષણં(ન્) દ્વિજગવાં(ન્), દેવાનાં(ઞ્) ચાપ્યમાયયા .

તત્ર લબ્ધેન સન્તોષઃ(શ્), શૂદ્રપ્રકૃતયસ્ત્વિમાઃ .. ૧૯..

શૂદ્ર + પ્રકૃતયસ્ + ત્વિમાઃ

અશૌચમનૃતં(મ્) સ્તેયં(ન્), નાસ્તિક્યં(મ્) શુષ્કવિગ્રહઃ .
કામઃ(ખ્) ક્રોધશ્ચ તર્ષશ્ચ, સ્વભાવોઽન્તેવસાયિનામ્ .. ૨૦..

સ્વભાવોઽન્તે + વસાયિનામ્

અહિં(વ્)સા સત્યમસ્તેય - મકામક્રોધલોભતા .
ભૂતપ્રિયહિતેહા ચ, ધર્મોઽયં(મ્) સાર્વવર્ણિકઃ .. ૨૧..

મકામક્રોધ + લોભતા, ભૂતપ્રિય + હિતેહા

દ્વિતીયં(મ્) પ્રાપ્યાનુપૂર્વ્યાજ્ - જન્મોપનયનં(ન્) દ્વિજઃ .
વસન્ ગુરુકુલે દાન્તો, બ્રહ્માધીયીત ચાહુતઃ .. ૨૨..

પ્રાપ્યા + નુપૂર્ + વ્યાજ્ , જન્મો + પનયનં(ન્)

મેખલાજિનદણ્ડાક્ષ - બ્રહ્મસૂત્રકમણ્ડલૂન્ .
જટિલોઽધૌતદદ્વાસોઽ - રક્તપીઠઃ(ખ્) કુશાન્ દધત્ .. ૨૩..

મેખલા + જિનદણ્ડાક્ષ , બ્રહ્મસૂત્ર + કમણ્ડલૂન્

જટિલોઽ + ધૌતદદ્ + વાસોઽ

સ્નાનભોજનહોમેષુ, જપોચ્ચારે ચ વાગ્યતઃ .
નચ્છિન્દ્યાન્નખરોમાણિ, કક્ષોપસ્થગતાન્યપિ .. ૨૪..

સ્નાન + ભોજન + હોમેષુ , જપોચ્ + ચારે

નચ્છિન્ + દ્યાન્ + નખરો + માણિ , કક્ષોપસ્ + થગતાન્ + યપિ

રેતો નાવકિરેજ્જાતુ, બ્રહ્મવ્રતધરઃ(સ્) સ્વયમ્ .
અવકીર્ણેઽવગાહ્યાપ્સુ, યતાસુસ્ત્રિપદીં(ગ્) જપેત્ .. ૨૫..

નાવ + કિરેજ્ + જાતુ, અવકીર્ણેઽ + વગાહ્ + યાપ્સુ

યતા + સુસ્ત્રિ + પદીં(ગ્)

અગ્ન્યર્કાચાર્યગોવિપ્ર - ગુરુવૃદ્ધસુરાઞ્છુચિઃ .
સમાહિત ઉપાસીત, સન્ધ્યે ચ યતવાગ્ જપન્ .. ૨૬..

અગ્ + ન્યર્ + કાચાર્ય + ગોવિપ્ર , ગુરુ + વૃદ્ધ + સુરાઞ્ + છુચિઃ

આચાર્યં(મ્) માં(મ્) વિજાનીયાન્ - નાવમન્યેત કર્હિચિત્ .
ન મર્ત્યબુદ્ધ્યાસૂયેત, સર્વદેવમયો ગુરુઃ .. ૨૭..

નાવ + મન્યેત, મર્ત્ય + બુદ્ધ્યા + સૂયેત

સાયં(મ્) પ્રાતરુપાનીય, ભૈક્ષ્યં(ન્) તસ્મૈ નિવેદયેત્ .
યચ્ચાન્યદપ્યનુજ્ઞાત - મુપયું(ગ્) જીત સં(ય્)યતઃ .. ૨૮..

યચ્ચાન્ + યદપ્ય + નુજ્ઞાત

શુશ્રૂષમાણ આચાર્ય(મ્), સદોપાસીત નીચવત્ .
યાનશય્યાસનસ્થાનૈર્ - નાતિદૂરે કૃતાં(ગ્)જલિઃ .. ૨૯..

યાનશય્યા + સનસ્ + થાનૈર્ , કૃતાં(ગ્) + જલિઃ

એવં(વ્)વૃત્તો ગુરુકુલે, વસેદ્ ભોગવિવર્જિતઃ .
વિદ્યા સમાપ્યતે યાવદ્, બિભ્રદ્ વ્રતમખણ્ડિતમ્ .. ૩૦..

વ્રત + મખણ્ડિતમ્

યદ્યસૌ છન્દસાં(મ્) લોક - મારોક્ષ્યન્ બ્રહ્મવિષ્ટપમ્ .
ગુરવે વિન્યસેદ્ દેહં(મ્), સ્વાધ્યાયાર્થં(મ્) બૃહદ્વ્રતઃ .. ૩૧..

બ્રહ્મ + વિષ્ટપમ્ ,સ્વાધ્યા + યાર્થં(મ્) , બૃહદ્ + વ્રતઃ

અગ્નૌ ગુરાવાત્મનિ ચ, સર્વભૂતેષુ માં(મ્) પરમ્ .
અપૃથગ્ધીરુપાસીત, બ્રહ્મવર્ચસ્વ્યકલ્મષઃ .. ૩૨..

ગુરા + વાત્મનિ, અપૃથગ્ધી + રુપાસીત, બ્રહ્મવર્ચસ્ + વ્યકલ્મષઃ

સ્ત્રીણાં(ન્) નિરીક્ષણસ્પર્શ - સં(લ્)લાપક્ષ્વેલનાદિકમ્ .
પ્રાણિનો મિથુનીભૂતા - નગૃહસ્થોઽગ્રતસ્ત્યજેત્ .. ૩૩..

નિરીક્ષણસ્ + પર્શ, સં(લ્)લા + પક્ષ્વે + લનાદિકમ્
નગૃહસ્થોઽ + ગ્રતસ્ + ત્યજેત્

શૌચમાચમનં(મ્) સ્નાનં(મ્), સન્ધ્યોપાસનમાર્જવમ્ .
તીર્થસેવા જપોઽસ્પૃશ્યા - ભક્ષ્યાસં(મ્)ભાષ્યવર્જનમ્ .. ૩૪..

શૌચમા + ચમનં(મ્), સન્ધ્યોપા + સન + માર્જવમ્
ભક્ષ્યા + સં(મ્)ભાષ્ય + વર્જનમ્

સર્વાશ્રમપ્રયુક્તોઽયં(ન્), નિયમઃ(ખ્) કુલનન્દન .
મદ્ભાવઃ(સ્) સર્વભૂતેષુ, મનોવાક્કાયસં(ય્)યમઃ .. ૩૫..

સર્વાશ્રમ + પ્રયુક્તોઽયં(ન્), મનોવાક્ + કાય + સં(ય્)યમઃ

એવં(મ્) બૃહદ્ વ્રતધરો, બ્રાહ્મણોઽગ્નિરિવ જ્વલન્ .
મદ્ભક્તસ્તીવ્રતપસા, દગ્ધકર્માશયોઽમલઃ .. ૩૬..

બ્રાહ્મણોઽગ્ + નિરિવ, મદ્ + ભક્તસ્ + તીવ્ર + તપસા , દગ્ધ + કર્મા + શયોઽમલઃ

અથાનન્તરમાવેક્ષ્યન્, યથા જિજ્ઞાસિતાગમઃ .
ગુરવે દક્ષિણાં(ન્) દત્ત્વા, સ્નાયાદ્ ગુર્વનુમોદિતઃ .. ૩૭..

અથા + નન્ત + રમાવેક્ષ્યન્

ગૃહં(મ્) વનં(મ્) વોપવિશેત્, પ્રવ્રજેદ્ વા દ્વિજોત્તમઃ .
આશ્રમાદાશ્રમં(ઙ્) ગચ્છેન્, નાન્યથા મત્પરશ્ચરેત્ .. ૩૮..

આશ્રમા + દાશ્રમં(ઙ્), મત્પરશ્ + ચરેત્

ગૃહાર્થી સદૃશીં(મ્) ભાર્યા - મુદ્વહેદજુગુપ્સિતામ્ .
યવીયસીં(ન્) તુ વયસા, તાં(મ્) સવર્ણામનુક્રમાત્ .. ૩૯..

મુદ્વહે + દજુગુપ્ + સિતામ્ , સવર્ણા + મનુક્રમાત્

ઇજ્યાધ્યયનદાનાનિ, સર્વેષાં(ઞ્) ચ દ્વિજન્મનામ્ .
પ્રતિગ્રહોઽધ્યાપનં(ઞ્) ચ, બ્રાહ્મણસ્યૈવ યાજનમ્ .. ૪૦..

ઇજ્યાધ્યય + નદાનાનિ, દ્વિજન્ + મનામ્
પ્રતિગ્રહોઽ + ધ્યાપનં(ઞ્) , બ્રાહ્મણસ્ + યૈવ

પ્રતિગ્રહં(મ્) મન્યમાનસ્ - તપસ્તેજોયશોનુદમ્ .
અન્યાભ્યામેવ જીવેત, શિલૈર્વા દોષદૃક્ તયોઃ .. ૪૧..

તપસ્ + તેજો + યશોનુદમ્

બ્રાહ્મણસ્ય હિ દેહોઽયં(ઙ્), ક્ષુદ્રકામાય નેષ્યતે .
કૃચ્છ્રાય તપસે ચેહ, પ્રેત્યાનન્તસુખાય ચ .. ૪૨..

પ્રેત્યા + નન્ત + સુખાય

શિલોઞ્છવૃત્ત્યા પરિતુષ્ટચિત્તો,
ધર્મં(મ્) મહાન્તં(મ્) વિરજં(ઞ્) જુષાણઃ .
મય્યર્પિતાત્મા ગૃહ એવ તિષ્ઠન્,
નાતિપ્રસક્તઃ(સ્) સમુપૈતિ શાન્તિમ્ .. ૪૩..

શિલોઞ્ + છવૃત્ત્યા

સમુદ્ધરન્તિ યે વિપ્રં(મ્), સીદન્તં(મ્) મત્પરાયણમ્ .
તાનુદ્ધરિષ્યે નચિરા-દાપદ્ભ્યો નૌરિવાર્ણવાત્ .. ૪૪..

સમુદ્ + ધરન્તિ , તાનુદ્ + ધરિષ્યે, નૌરિવાર્ + ણવાત્

સર્વાઃ(સ્) સમુદ્ધરેદ્ રાજા, પિતેવ વ્યસનાત્ પ્રજાઃ .
આત્માનમાત્મના ધીરો, યથા ગજપતિર્ગજાન્ .. ૪૫..

સમુદ્ + ધરેદ્, આત્મા + નમાત્મના

એવં(વ્)વિધો નરપતિર્- વિમાનેનાર્કવર્ચસા .
વિધૂયેહાશુભં(ઙ્) કૃત્સ્ન-મિન્દ્રેણ સહ મોદતે .. ૪૬..

વિમાને + નાર્ક + વર્ચસા, વિધૂયે + હાશુભં(ઙ્)

સીદન્ વિપ્રો વણિગ્વૃત્ત્યા, પણ્યૈરેવાપદં(ન્) તરેત્ .
ખડ્ગેન વાઽઽપદાક્રાન્તો, ન શ્વવૃત્ત્યા કથં(ઞ્)ચન .. ૪૭..

વણિગ્ + વૃત્ત્યા , પણ્યૈ + રેવા + પદં(ન્)

વૈશ્યવૃત્ત્યા તુ રાજન્યો, જીવેન્મૃગયયાઽઽપદિ .
ચરેદ્ વા વિપ્રરૂપેણ, ન શ્વવૃત્ત્યા કથં(ઞ્)ચન .. ૪૮..

જીવેન્ + મૃગ + યયાઽઽપદિ

શૂદ્રવૃત્તિં(મ્) ભજેદ્ વૈશ્યઃ(શ્), શૂદ્રઃ(ખ્) કારુકટક્રિયામ્ .
કૃચ્છ્રાન્મુક્તો ન ગર્હ્યેણ, વૃત્તિં(મ્) લિપ્સેત કર્મણા .. ૪૯..

કૃચ્છ્રાન્ + મુક્તો

વેદાધ્યાયસ્વધાસ્વાહા- બલ્યન્નાદ્યૈર્યથોદયમ્ .
દેવર્ષિપિતૃભૂતાનિ, મદ્રૂપાણ્યન્વહં(મ્) યજેત્ .. ૫૦..

વેદાધ્યાયસ્ + વધાસ્વાહા, બલ્યન્ના + દ્યૈર્ + યથોદયમ્

યદૃચ્છયોપપન્નેન, શુક્લેનોપાર્જિતેન વા .
ધનેનાપીડયન્ ભૃત્યાન્, ન્યાયેનૈવાહરેત્ ક્રતૂન્ .. ૫૧..

યદૃચ્ + છયો + પપન્નેન, શુક્લે + નોપાર્ + જિતેન ,ન્યાયે + નૈવાહરેત્

કુટુમ્બેષુ ન સજ્જેત, ન પ્રમાદ્યેત્ કુટુમ્બ્યપિ .
વિપશ્ચિન્નશ્વરં(મ્) પશ્યે-દદૃષ્ટમપિ દૃષ્ટવત્ .. ૫૨..

કુટુમ્ + બ્યપિ, વિપશ્ + ચિન્ + નશ્વરં(મ્)

પુત્રદારાપ્તબન્ધૂનાં(મ્) સં(ઙ્)ગમઃ(ફ્) પાન્થસં(ઙ્)ગમઃ .
અનુદેહં(મ્) વિયન્ત્યેતે, સ્વપ્નો નિદ્રાનુગો યથા .. ૫૩..

પુત્રદા + રાપ્ત + બન્ધૂનાં(મ્)

ઇત્થં(મ્) પરિમૃશન્મુક્તો, ગૃહેષ્વતિથિવદ્ વસન્ .
ન ગૃહૈરનુબધ્યેત, નિર્મમો નિરહં(ઙ્)કૃતઃ .. ૫૪..

પરિમૃશન્ + મુક્તો, ગૃહેષ્ + વતિથિ + વદ્ ,ગૃહૈ + રનુબધ્યેત

કર્મભિર્ગૃહમેધીયૈ-રિષ્ટ્વા મામેવ ભક્તિમાન્ .
તિષ્ઠેદ્ વનં(મ્) વોપવિશેત્, પ્રજાવાન્ વા પરિવ્રજેત્ .. ૫૫..

કર્મભિર્ + ગૃહમેધીયૈ

યસ્ત્વાસક્તમતિર્ગેહે, પુત્રવિત્તૈષણાતુરઃ .
સ્ત્રૈણઃ(ખ્) કૃપણધીર્મૂઢો, મમાહમિતિ બધ્યતે .. ૫૬..

યસ્ત્વા + સક્ત + મતિર્ + ગેહે, પુત્રવિત્તૈ + ષણાતુરઃ

અહો મે પિતરૌ વૃદ્ધૌ, ભાર્યા બાલાત્મજાઽઽત્મજાઃ .
અનાથા મામૃતે દીનાઃ(ખ્), કથં(ઞ્) જીવન્તિ દુઃખિતાઃ .. ૫૭..

બાલાત્ + મજાઽઽત્ + મજાઃ

એવં(ઙ્) ગૃહાશયાક્ષિપ્ત-હૃદયો મૂઢધીરયમ્ .
અતૃપ્તસ્તાનનુધ્યાયન્, મૃતોઽન્ધં(મ્) વિશતે તમઃ .. ૫૮..

અતૃપ્તસ્તા + નનુધ્યાયન્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)
સંહિતાયામેકાદશસ્કન્ધે સપ્તદશોઽધ્યાયઃ .. ૧૭..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.